नं. 1

संजीव®

बुक्स

संस्कृत-XII

(कक्षा 12 के विद्यार्थियों के लिए)

माध्यमिक शिक्षा बोर्ड, राजस्थान के विद्यार्थियों के लिए

पूर्णतः नवीनतम पाठ्यक्रमानुसार

- माध्य. शिक्षा बोर्ड, 2026 के प्रश्न-पत्र का समावेश
- पाठ्यपुस्तक के सभी अभ्यास प्रश्नों का हल
- सभी प्रकार के अन्य महत्वपूर्ण प्रश्नों का समावेश
- योग्य एवं अनुभवी लेखकों द्वारा लिखित
- प्रथम श्रेणी प्राप्त करने के लिए पूर्ण सामग्री

2027

संजीव प्रकाशन,
जयपुर

मूल्य : ₹ 400/-

- प्रकाशक :

  संजीव प्रकाशन

  धामाणी मार्केट, चौड़ा रास्ता,

  जयपुर-3

  Email : sanjeevprakashanjaipur@gmail.com

  Website : www.sanjivprakashan.com

- © प्रकाशकाधीन

- **मूल्य : ₹ 400.00**

- लेजर कम्पोजिंग :

  संजीव प्रकाशन (D.T.P. Department), जयपुर

- मुद्रक :

  मनोहर आर्ट प्रिन्टर्स, जयपुर

  ★★★★★★★

❖ इस पुस्तक में त्रुटियों को दूर करने के लिए हर संभव प्रयास किया गया है। किसी भी त्रुटि के पाये जाने पर अथवा किसी भी तरह के सुझाव के लिए आप हमें निम्न पते पर email या पत्र भेजकर सूचित कर सकते हैं—

Email : sanjeevprakashanjaipur@gmail.com

पता : प्रकाशन विभाग संजीव प्रकाशन

धामाणी मार्केट, चौड़ा रास्ता, जयपुर

आपके द्वारा भेजे गये सुझावों से अगला संस्करण और बेहतर हो सकेगा।

❖ इस पुस्तक में प्रकाशित किसी त्रुटि के प्रति तथा इससे होने वाली किसी भी क्षति के लिए लेखक, प्रकाशक, संपादक तथा मुद्रक किसी भी रूप में जिम्मेदार नहीं हैं।

❖

माध्यमिक शिक्षा बोर्ड, राजस्थान
पाठ्यक्रम

संस्कृत साहित्य–कक्षा 12

इस विषय की परीक्षा योजना निम्नानुसार है—

प्रश्न-पत्र	समय (घंटे)	प्रश्न-पत्र के लिए अंक	सत्रांक	पूर्णांक
एक पत्र	3.15	80	20	100

एकम्-प्रश्नपत्रम्

अवधि : सपादहोरात्रयम् (3¼) **पूर्णांकाः 80**

क्र.सं.	अधिगम-क्षेत्रम्	अङ्काः
1.	पठित-अवबोधनम्	32
2.	संस्कृतसाहित्येतिहासस्य परिचयः	08
3.	छन्दोऽलङ्काराः	10
4.	अपठित-अवबोधनम्	08
5.	रचनात्मककार्यम्	12
6.	व्याकरणम्	10

1. पठित-अवबोधनम्– **32**

1. पाठ्यपुस्तकात् बहुविकल्पात्मकप्रश्नाः (सप्त प्रश्नाः) 1×7=7
2. अंशत्रयम्—(एकः गद्यांशः, एकः पद्यांशः, एकः नाट्यांशः च) 5+5+5=15

   प्रश्न-वैविध्यम्—

   (क) एकपदेन उत्तरम् (प्रश्नमेकम्) 1

   (ख) पूर्णवाक्येन उत्तरम् (प्रश्नमेकम्) 2

   (ग) भाषिककार्यम् (बहुविकल्पात्मकप्रश्नद्वयम्) 1×2=2

   (i) विशेषण-विशेष्यचयनम्।

   (ii) कर्तृक्रियापदचयनम्।

   (iii) सर्वनामसंज्ञाप्रयोगः।

   (iv) पर्याय-विलोमपदचयनम्।
3. कथनानि आश्रित्य प्रश्ननिर्माणम् (त्रयाणाम्) 3
4. हिन्दीभाषायां सप्रसङ्गं भावार्थलेखनम् (एकस्य पद्यांशस्य सूक्तवचनस्य वा) 2
5. अन्वयलेखनम् (एकस्य पद्यस्य) 2
6. एकस्य गद्यपाठस्य हिन्दीभाषायां सारलेखनम् 3

2. संस्कृतसाहित्येतिहासस्य सामान्यं परिचयः– **08**

(अ) प्राचीन-संस्कृतसाहित्येतिहासः (लघूत्तरात्मकप्रश्नद्वयम्) 2×2=4

(ब) आधुनिक-संस्कृत-साहित्यस्य परिचयः (लघूत्तरात्मकप्रश्नद्वयम्) 2×2=4

3. छन्दोऽलङ्काराः **5+5=10**

(क) छन्द-परिचयः– **5**

(i) लघुगुरुविवेकः, छन्दसः सामान्यज्ञानम् (बहुविकल्पात्मकाः) 1

(ii) अधोलिखितछन्दसां सोदाहरणं लक्षणम्–(लघूत्तरात्मकाः) 2
(द्वयोः एकस्य)
अनुष्टुप्, उपेन्द्रवज्रा, इन्द्रवज्रा, वंशस्थ, वसन्ततिलका, भुजंगप्रयातम्,
हरिणीः, मालिनी, शिखरिणी, मन्दाक्रान्ता, शार्दूलविक्रीडितम्।

(iii) पद्यांशेषु गणचिन्हपूर्वकम् छन्दज्ञानम् (द्वयोः एकस्य) (लघूत्तरात्मकाः) 2

(ख) अलङ्काराः– **5**

1. अधोलिखित-अलङ्काराणाम् उदाहरणसहितलक्षणज्ञानम्— 3
(द्वयोः एकस्य)
(i) शब्दालङ्काराः–अनुप्रासः, यमकः, श्लेषः
(ii) अर्थालङ्काराः–उपमा, रूपकम्, उत्प्रेक्षा, अर्थान्तरन्यासः, दीपकम्,
दृष्टान्तः, अतिशयोक्तिः, विभावना, विशेषोक्ति, व्यतिरेकः।

2. (i) पद्यांशेषु अलङ्कारस्य नामोल्लेखम्
(बहुविकल्पात्मक/अतिलघूत्तरात्मकप्रश्नमेकम्) 1

(ii) कस्यापि अलङ्कारस्य सामान्य लक्षणज्ञानम्
(बहुविकल्पात्मक/अतिलघूत्तरात्मकप्रश्नमेकम्) 1

4. अपठित-अवबोधनम्– **08**

80-100 शब्दपरिमितः एकः सरलः अपठितः गद्यांशः
(सम्पादितः सरलः साहित्यिकः अंशः)
प्रश्नवैविध्यम्–

(i) एकपदेन-उत्तरम् (प्रश्नद्वयम्) 1×2=2

(ii) पूर्णवाक्येन-उत्तरम् (प्रश्नमेकम्) 2×1=2

(iii) **भाषा-सम्बद्धकार्यम् (प्रश्नत्रयम्)** 1×3=3

(क) कर्तृ-क्रियापदचयनम्

(ख) विशेषण-विशेष्य-प्रयोगः

(ग) सर्वनामप्रयोगः/संज्ञाप्रयोगः

(घ) शब्दार्थचयनम्/विलोमचयनम्

(iv) समुचितशीर्षकप्रदानम् 1

5. रचनात्मककार्यम्– **12**

(i) प्रदत्तरूपरेखया कथासंयोजनम्/क्रमायोजनम् 4

(ii) कमपि विषयं स्वीकृत्य 50-60 शब्देषु संस्कृतभाषायां लघुनिबन्धलेखनम् 4

(iii) हिन्दीभाषायां लिखितानां षड्वाक्येषु चतुर्णां वाक्यानां संस्कृतभाषया अनुवादकार्यम् 4

6. व्याकरणम्– **10**

(**प्रश्नाः**–बहुचयनात्मकाः, रिक्तस्थानपूर्तिः, अतिलघूत्तरात्मकाः प्रश्नाः च)

(3) (5) (2)

(i) स्वरसन्धिः, व्यञ्जनसन्धिः (प्रमुख सूत्राणि उदाहरणानि च लघुसिद्धान्तकौमुद्यानुसारम्) 3

(ii) कारकाणि—उपपदविभक्तीनां सूत्रसहितं ज्ञानम् 3

(iii) प्रत्ययाः (सूत्रसहितं सोदाहरणं सामान्यज्ञानं प्रयोगाश्च)—तव्यत्, अनीयर्, यत्, ण्यत्, क्यप्, शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्। 4

निर्धारितपुस्तकानि–

शाश्वती (भाग 2) (राष्ट्रीय-शैक्षिक-अनु. एवं प्रशिक्षण परिषदा प्रकाशितम्)

नोट– विद्यार्थी उपर्युक्त पाठ्यक्रम को माध्यमिक शिक्षा बोर्ड की Website पर उपलब्ध अधिकृत पाठ्यक्रम से मिलान अवश्य कर लें। माध्यमिक शिक्षा बोर्ड की Website पर उपलब्ध पाठ्यक्रम ही मान्य होगा।

विषय-सूची

1. पठित अवबोधनम्

शाश्वती (द्वितीयो भागः)

मङ्गलम्		1-2
प्रथमः पाठः	विद्ययाऽमृतमश्नुते	2-15
द्वितीयः पाठः	रघुकौत्ससंवादः	15-41
तृतीयः पाठः	बालकौतुकम्	41-61
चतुर्थः पाठः	कर्मगौरवम्	61-77
पञ्चमः पाठः	शुकनासोपदेशः	77-92
षष्ठः पाठः	सूक्तिसुधा	92-112
सप्तमः पाठः	विक्रमस्यौदार्यम्	112-127
अष्टमः पाठः	कार्यं वा साधयेयम्, देहं वा पातयेयम्	127-136
नवमः पाठः	दीनबन्धुः श्रीनायारः	136-147
दशमः पाठः	योगस्य वैशिष्ट्यम्	147-165
एकादशः पाठः	कथं शब्दानुशासनं कर्तव्यम्	165-174

2. संस्कृतसाहित्येतिहासस्य सामान्यं परिचयः

(अ) प्राचीन संस्कृत-साहित्य का इतिहास	175-203
(ब) आधुनिक संस्कृत साहित्य का इतिहास	204-212

अभ्यासार्थ महत्त्वपूर्ण प्रश्नोत्तर–

(अ) प्राचीन संस्कृत साहित्य का इतिहास 212–226

(ब) आधुनिक संस्कृत साहित्य का इतिहास 226–232

3. छन्दोऽलंकार-परिचयः

(क) छन्द : परिचय 233–247

(ख) अलंकार–परिचयः 247–259

4. अपठित-अवबोधनम्

80–100 शब्दपरिमिताः सरलगद्यांशाः 260–279

5. रचनात्मक-कार्यम्

(i) प्रदत्तरूपरेखया कथा संयोजनम्/क्रमायोजनम् 280–295

(ii) लघु निबन्ध-लेखनम् 295–301

(iii) अनुवाद-कार्यम् 301–321

6. व्याकरणम्

(i) सन्धिप्रकरणम् 324–349

(ii) कारकाणि 349–376

(iii) प्रत्ययाः (सूत्रसहितं सोदाहरणं सामान्यज्ञानं प्रयोगाश्च) 376–392

उच्च माध्यमिक परीक्षा, 2026

संस्कृतसाहित्यम्

समय : 3 घण्टे 15 मिनट (सपादत्रिवादनम्) **पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्य निर्देशाः

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतः लेख्यः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम्।
4. प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

खण्डः-'अ'

1. बहुविकल्पात्मकप्रश्नाः— [1×12=12]

(i) कया अमृतम् अश्नुते? [1]
(अ) सुधया (ब) विद्यया (स) अविद्यया (द) पूजया

(ii) ''कर्मगौरवम्'' इति पाठः कुतः सङ्कलितः? [1]
(अ) उत्तररामचरितत: (ब) रघुवंशत: (स) श्रीमद्भगवद्गीतात: (द) रामायणत:

(iii) चन्द्रापीडं कः उपदिशति? [1]
(अ) तारापीडः (ब) शुकनासः (स) लक्ष्मीः (द) राजा

(iv) कः परमापदां पदम्? [1]
(अ) अविवेकः (ब) परिश्रमः (स) विवेकः (द) उपायः

(v) ''कार्यं वा साधयेयम्, देहं वा पातयेयम्'' इति उक्तिः अस्ति। [1]
(अ) शिववीररस्य (ब) कविवरस्य (स) गुप्तचरस्य (द) प्रजाजनस्य

(vi) 'चित्तवृत्तिनिरोधः' इति किम् उच्यते? [1]
(अ) योगः (ब) यमः (स) नियमः (द) अपरिग्रहः

(vii) ते अधिकारः कुत्र वर्तते? [1]
(अ) शयने (ब) कायेत्यागे (स) निन्दने (द) कर्मणि

(viii) मगणस्य चिह्नम् अस्ति। [1]
(अ) ।ऽऽ (ब) ऽऽऽ (स) ऽ।ऽ (द) ऽऽ।

(ix) 'इकोयणचि' इति सूत्रस्य उदाहरणम् अस्ति। [1]
(अ) श्रीशः (ब) गङ्गोदकम् (स) सुध्युपास्यः (द) दैत्यारिः

(x) 'रामश्शेते' इत्यत्र कः सन्धिः वर्तते? [1]
(अ) श्चुत्वम् (ब) ष्टुत्वम् (स) जश्त्वम् (द) अनुस्वारः

(xi) हरिं वन्दे। अत्र सन्धिविधायकं सूत्रं किम्? [1]
(अ) ष्टुनाष्टुः (ब) मोऽनुस्वारः (स) स्तोः श्चुनाश्चुः (द) झलां जशोऽन्ते

(xii) कस्मिन् अलङ्कारे सम्भावना भवति? [1]
(अ) अनुप्रासे (ब) रूपके (स) दीपके (द) उत्प्रेक्षायाम्

2. **कोष्ठकनिर्देशानुसारं रिक्तस्थानानि पूरयत—** [1×5=5]

(i) अयि जात! ..... कथय। (कथ् + तव्यत्) [1]

(ii) न ..... आकर्णयति। (श्रु + क्त) [1]

(iii) मम जीवनप्रदीयो निर्वापितो ..... इच्छति। (भू + तुमुन्) [1]

(iv) इति जलमध्ये पुष्पाञ्जलिं ..... क्षणं स्थितः। (दा + क्त्वा) [1]

(v) तस्य ..... सह अस्ति कश्चित् सम्पर्कः। ('राज्य' इति शब्दे उचितविभक्तिं संयोज्य लिखत) [1]

3. **अधोलिखितरेखाङ्कितशब्दान् आधारीकृत्य विभक्तिं तत्कारणञ्च लिखत।** [1×2=2]

(क) धिक् त्वाम्। [1]

(ख) नमोऽस्तु अनन्ताय। [1]

4. अधोलिखितपद्यांशे अलङ्कारस्य नामोल्लेखं कुरुत। [1]

श्रुतप्रकाशं यशसा प्रकाशः

खण्डः-'ब'

5. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत— [2×4=8]

(क) श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति? [2]

(ख) बाणभट्टस्य प्रसिद्धाः रचनाः काः? [2]

(ग) श्रीचन्द्रशेखरदासवर्मणः प्रसिद्धौ कथासङ्ग्रहौ कौ? [2]

(घ) 'शिवराजविजय' नामकस्य प्रसिद्धस्य उपन्यासस्य रचयिता कः? [2]

6. अधोलिखितयोः छन्दसोः एकस्य छन्दसः लक्षणम् उदाहरणञ्च लिखत। [2]

(क) वसन्ततिलका

(ख) उपेन्द्रवज्रा

7. अधोलिखित श्लोकांशयोः एकस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत। [2]

(क) हंसो यथा राजतपञ्जरस्थः।

(ख) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।

8. अधोलिखित श्लोकस्य अन्वयं लिखत— [2]

अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम्।
रमते न मरालस्य मानसं मानसं विना॥

9. अधोलिखित पद्यांशयोः **एकस्य** हिन्दीभाषयां सप्रसङ्गं भावार्थं लिखत। [2]

(क) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

(ख) सन्मित्र लक्षणमिदं प्रवदन्ति सन्तः।

10. अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानामुत्तराणि यथानिर्देशं लिखत।

यद्यपि लोभवशात् जनाः कार्यशीलाः भवन्ति परन्तु यदा अतिलोभः भवति तदा जनाः दुष्टानि कर्माणि कुर्वन्ति, चौर्यं कुर्वन्ति, हत्यां कुर्वन्ति। अतिलोभस्य सीमा नास्ति। मृगतृष्णावत् अतिलोभः अधिकाधिकं वर्धते। अन्ते मनुष्यः पूर्णतया नष्टः भवति। अतिलोभः विनाशकारकः एव। अतः विद्वांसः अतिलोभं न कुर्वन्ति कदापि।

(क) एकपदेन उत्तरत— [1×2=2]

(i) कस्य सीमा नास्ति? [1]

(ii) अतिलोभः कथं वर्धते? [1]

(ख) पूर्णवाक्येन उत्तरत— [2]

अतिलोभितजनाः कीदृशानि कार्याणि कुर्वन्ति?

(ग) भाषासम्बद्धकार्यम्— [1×3=3]

(i) नास्ति इति क्रियापदस्य कर्तृपदं किम्? [1]

(ii) अतिलोभः विनाशकारकः एव अत्र विशेषणपदं किम्? [1]

(iii) 'मूर्खाः' इति पदस्य विलोमपदं किम्? [1]

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। [1]

खण्डः-'स'

11. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

सोऽपि समुद्रतीरं गत्वा गन्धपुष्पादिषोडशोपचारं विधायाब्रवीत् ''भोः समुद्र! विक्रमार्को राजा यज्ञं करोति। तेन प्रेषितोऽहं त्वामाह्वातुं समागतः।'' इति जलमध्ये पुष्पाञ्जलिं दत्वा क्षणं स्थितः। कोऽपि तस्य प्रत्युत्तरं न ददौ। ततः उज्जयिनीं यावत्प्रत्यागच्छति तावद्देदीप्यमानशरीरः समुद्रो ब्राह्मणरूपी सन् तमागत्यावदत् ''भो ब्राह्मण, विक्रमेणास्मानह्वातुं प्रेषितस्त्वं, तर्हि तेन या अस्माकं सम्भावना कृता सा प्राप्तैव। एतदेव सुहृदो लक्षणं यत्समये दानमानादिकं क्रियते।''

(क) एकपदेन उत्तरत। [1]

कः ब्राह्मणरूपं धृत्वा अवदत्?

(ख) पूर्णवाक्येन उत्तरत। [2]

सुहृदः लक्षणं किम्?

(ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत)— [1×2=2]

(i) एतदेव सुहृदः लक्षणम्। अत्र विशेषणपदं किम्? [1]

(अ) लक्षणम् (ब) एव (स) एतद् (द) सुहृदः

(ii) कोऽपि तस्य प्रत्युत्तरं न ददौ। अत्र क्रियापदं किम्? [1]

(अ) उत्तरम् (ब) ददौ (स) तस्य (द) न

अथवा

भगवान् यीशुस्तव मङ्गलं वितनोतु। मम पूर्वतनं पत्रं त्वया प्राप्तं स्यात्। तव समीपे इदं मम शेषपत्रम्। यतो हि मम जीवनप्रदीपो निर्वापितो भवितुमिच्छति। प्रायस्तवागमनसमये अहं न स्थास्यामि। पूर्वपत्रे-अहमाश्रमस्य सर्वविधमायव्ययाकलनं प्रेषितवती। केवलं यीशोः समीपे गमनात्पूर्वं तव दर्शनमिच्छामि। प्रथमं त्वया निर्मितोऽनाथाश्रमोऽधुना महाद्रुमेण परिणतः। अधुनात्र शताधिंका अनाथशिशवो लालिताः पालिताश्च भवन्ति।

(क) एकपदेन उत्तरत। [1]

भगवान् यीशुः किं वितनोतु?

(ख) पूर्णवाक्येन उत्तरत। [2]

अधुना कः महाद्रुमेण परिणतः?

(ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत)— [1×2=2]

(i) अनाथशिशवः इति विशेष्यपदस्य विशेषणपदं किम्? [1]

(अ) गर्विताः (ब) लालिताः (स) प्रसन्नाः (द) उपर्युक्तानि सर्वाणि पदानि

(ii) स्थास्यामि इति क्रियायाः कर्तृपदं किम्? [1]

(अ) अहम् (ब) त्वम् (स) वयम् (द) ते

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येद कर्मणः॥

(क) एकपदेन उत्तरत— [1]

ज्यायः किम्?

(ख) पूर्णवाक्येन उत्तरत— [2]

अकर्मणः किं न सिद्धयेत्?

(ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत)— [1×2=2]

(i) ''नियतं कुरु कर्म त्वम्'' अत्र क्रियापदं किम्? [1]

(अ) नियतम् (ब) कुरु

(स) त्वम् (द) कर्म

(ii) 'कर्म ज्यायः हि अकर्मणः' अत्रः ज्यायः इति पदस्य विशेष्यपदं किम्? [1]

(अ) हि (ब) ज्यायः (स) कर्म (द) अकर्मणः

अथवा

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः॥

(क) एकपदेन उत्तरत— [1]

हंसः कस्मिन् आलस्यं न कुर्यात्?

(ख) पूर्णवाक्येन उत्तरत— [2]

'नीरक्षीरविवेकः' इति कस्य कुलव्रतम् अस्ति?

(ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत)— [1×2=2]

(i) त्वमेव तनुषे चेत्। अत्र क्रियापदं किम्? [1]

(अ) त्वम् (ब) चेत् (स) एव (द) तनुषे

(ii) अत्र 'स्फूर्तिः' इति शब्दस्य विलोमपदं किं प्रयुक्तम्? [1]

(अ) कुलव्रतम् (ब) आलस्यम् (स) विश्वस्मिन् (द) चेत्

13. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानामुत्तराणि यथानिर्देशं लिखत।

अरुन्धतीजनकौ : महत्कौतुकं वत्सस्य।

कौशल्या : अरण्यगर्भरुपालापै यूयं तोषिता वयं च। भगवति!
जानामि तं पश्यन्ती वञ्चितेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम्।

अरुन्धती : अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते? (प्रविश्य)

बटवः : पश्यतु कुमारस्तावदाश्चर्यम्।

लवः : दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः।

बटवः : कथं ज्ञायते?

(क) एकपदेन उत्तरत— [1]

यूयं वयं च कैः तोषिताः?

(ख) पूर्णवाक्येन उत्तरत— [2]

लवः अश्वविषये किं ज्ञातवान्?

(ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत)— [1×2=2]

(i) सः चपलः कथं दृश्यते? अत्र क्रियापदं किम्? [1]

(अ) चपलः (ब) कथम् (स) सः (द) दृश्यते

(ii) 'अतिवेगेन' इति पदस्य अत्र पर्यायपदं किम्? [1]

(अ) अतिक्रान्तः (ब) अतिकार्येण (स) अतिजवेन (द) अतिधनेन

अथवा

स्वप्निलः — बलराम! अद्य कक्षायां कोऽपि विशिष्टः कार्यक्रमः?
बलरामः — अरे मित्र! त्वं न जानासि? इदानीं तु योगशिक्षायाः कालांशः।
मोहिनी — एषः तु नूतनः विषयः। किं प्रतिदिनम् ईदृशी कक्षा प्रचलिष्यति?
बलरामः — आम्, अधुना तु अस्माकं कृते योगशिक्षा अतीव उपयोगिनी अस्ति।
सागरिका — अहो! सुखदमाश्चर्यम्। अहमपि गृहे मातुः मुखाद् योगशिक्षायाः विषये श्रुतवती। तया उक्तम् 'योगः स्वास्थ्यकरः।'
सागरः — किं विद्याध्ययनेऽपि अस्योपयोगः वर्तते?
मोहिनी — आम् अस्मिन् विषये योगशिक्षकः विशेषरूपेण वदिष्यति।

(क) एकपदेन उत्तरत— [1]
कः स्वास्थ्यकरः वर्तते?

(ख) पूर्णवाक्येन उत्तरत— [2]
सागरिका योगशिक्षायाः विषये कुतः श्रुतवती?

(ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत)— [1×2=2]

(i) 'तु नूतनः विषयः' अत्र विशेषणपदं किम्? [1]
(अ) नूतनः (ब) विषयः (स) तु (द) न किमपि

(ii) किं विद्याध्ययनेऽपि अस्योपयोगः वर्तते? अत्र क्रियापदं किम्? [1]
(अ) किम् (ब) उपयोगः (स) वर्तते (द) अस्य

14. रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत। (केषाञ्चित् त्रयाणाम्) [1×3=3]
(क) तच्छ्रुत्वा राजा तूष्णीम् आसीत्।
(ख) शिववीरचरः स्वकार्याद् न विरमति।
(ग) श्रीनायारः स्वल्पभाषी आसीत्।
(घ) चित्तवृत्तिनिरोधः योगः कथ्यते।
(ङ) चातकः शरद्घनं न याचते।

15. 'शुकनासोपदेशः' अथवा 'दीनबन्धुः श्रीनायारः' पाठस्य सारं हिन्दीभाषया लिखत। [3]

16. अधोलिखितयोः अलङ्कारयोः कस्यचिद् **एकस्य** लक्षणम् उदाहरणं च लिखत। [3]
(क) अनुप्रासः
(ख) रूपकम्

खण्डः-'द'

17. प्रदत्तरूपरेखया कथासंयोजनं कृत्वा लिखत। [4]
एकस्मिन् ग्रामे सौचिकः ..... स्म। तस्य वस्त्रसीवनस्य ..... आसीत्। तत्र प्रतिदिनम् ..... गजः आयाति स्म। सः तस्मै रोटिकाः .....। गजः रोटिकाः खादित्वा तस्मै ..... ददाति स्म। गच्छताकालेन एकदा सौचिकेन ..... शुण्डायां सूचिकया ..... कृतः। दुःखितः क्रुद्धश्च गजः ..... गत्वा मलिनं ..... शुण्डायां पूरयित्वा ..... आपणे क्षिप्तवान्। सौचिकस्य वस्त्राणि मलिनानि जातानि।

अथवा

अधोलिखितानि क्रमरहितानि वाक्यानि समुचितक्रमानुसारं लिखत। [4]
(क) एकस्मिन् वने एकः चपलः वानरः वसति स्म।
(ख) तत्र एकेन वृद्धकपोतेन उपायं सूचयित्वा उक्तम् अहं सर्वान् कष्टमुक्तान् करोमि।

(ग) सर्वे खगाः तस्य दुर्व्यवहारेण पीडिताः जाताः।

(घ) स च अन्यान् वन्यप्राणिनः पीडयति स्म। खगानां मीडानि नाशयति स्म।

(ङ) कपोतेन उक्तं मातुल! मधुमक्षिकाणां गृहं सुरक्षितमतः इमाः उपहसन्ति।

(च) ते कष्टोपायविषये गोष्ठीम् अकुर्वन्।

(छ) मधुमक्षिका दंशेन पीडितः वानरः मृतः।

(ज) वानरेण मधुमक्षिकाणां गृहं खण्डितम्।

18. निम्नलिखितयोः कमपि **एकं** विषयं स्वीकृत्य 50-60 शब्देषु संस्कृतभाषाया निबन्धं लिखत। [4]

(क) स्वतन्त्रता दिवसः

(ख) मम प्रियः कविः

19. अधोलिखित वाक्यानां संस्कृतभाषाया अनुवादः करणीयः। (केषाञ्चित् चतुर्णाम्) [1×4=4]

(क) उद्यान में पुष्प खिल रहे हैं।

(ख) हम सब प्रातः योगाभ्यास करते हैं।

(ग) मुझे सुभाषित अच्छा लगता है।

(घ) वृक्ष सभी को प्राणवायु देते हैं।

(ङ) मैं कल आऊँगा।

(च) विद्याधन ही सुरक्षित धन हैं।

संस्कृत कक्षा-XII

1. पठित अवबोधनम्

शाश्वती (द्वितीयो भागः)

मङ्गलम्

(1)

भद्रं कर्णेभिः शृणुयाम देवाः
भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनुभि-
र्व्यशेमहि देवहितं यदायुः॥ 1॥

अन्वयः–देवाः ! (वयं) कर्णेभिः भद्रं शृणुयाम। अक्षभिः भद्रं पश्येम। स्थिरैः अङ्गैः तनुभिः तुष्टुवांसः देवहितं यदायुः व्यशेमहि॥

शब्दार्थ–देवाः = हे देवगण ! **कर्णेभिः** = कानों से। **भद्रम्** = कल्याणकारी। **शृणुयाम** = सुने। **अक्षभिः** = आँखों से। **पश्येम** = देखें। **स्थिरैः अङ्गैः** = स्थिर अंगों से। **तनुभिः** = शरीरों से। **देवहितम्** = दिव्य। **व्यशेमहि** = प्राप्त करें।

हिन्दी-अनुवाद–हे देवगण ! (हम) कानों से कल्याणकारी वचनों को सुनें। आँखों से कल्याणकारी दृश्य देखें। स्थिर अंगों वाले शरीरों से स्तुति करते हुये दिव्य आयु (शतायु) को प्राप्त करें।

(2)

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।
माध्वीर्नः सन्त्वोषधीः ॥ 2॥

अन्वयः–मधु वाता ऋतायते। सिन्धवः मधु क्षरन्ति। ओषधीः नः माध्वीः सन्तु।

शब्दार्थ–मधु = सुगन्धियुक्त। **वाताः** = वायु, हवा। **ऋतायते** = बहे। **सिन्धवः** = नदियाँ, सागर। **मधु** = मधुर जल को। **क्षरन्ति** = युक्त हो। **ओषधीः** = ओषधियाँ। **नः** = हमारे लिए। **माध्वीः** = मधुमय, अमृततुल्य। **सन्तु** = होवें।

हिन्दी-अनुवाद–सुगन्धियुक्त वायु बहे, हवा चले। नदियाँ मधुर जल से युक्त हों। ओषधियाँ हमारे लिए अमृततुल्य होवें।

(3)

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः।
मधु द्यौरस्तु नः पिता॥ 3॥

अन्वयः–नक्तम् मधु (अस्तु), उत उषस मधुमत् (अस्तु), पार्थिवं रजः मधुमत् (अस्तु), द्यौः मधु अस्तु, पिता नः मधु अस्तु॥

शब्दार्थ–नक्तम् = रात्रि। **मधु** = मधुमय। **उषस** = उषाकाल, प्रातःकाल। **मधुमत्** = माधुर्य युक्त। **पार्थिवम्** = पृथ्वी की। **रजः** = धूलि। **द्यौः** = द्यु लोक। **पिता** = परमेश्वर। **नः** = हमारे लिए। **अस्तु** = होवे।

हिन्दी-अनुवाद–रात्रियाँ मधुमय हों, माधुर्य युक्त होवें। प्रातःकाल मधुर (सुप्रभात) हों। पृथिवी की धूलि भी मधुमय अर्थात् मधुर अन्न को प्रदान करने वाली होवे। द्यु लोक प्रकाशयुक्त होवे। वह परम पिता परमेश्वर हमारे लिए कल्याणकारी हो।

(4)

मधुमान्नोवनस्पतिर्मधुमाँ अस्तु सूर्यः।
माध्वीर्गावो भवन्तुः नः ॥ 4॥

अन्वयः–वनस्पतिः नः मधुमान् (अस्तु), सूर्यः मधुमान् अस्तु, गावः नः माध्वीः भवन्तु॥

शब्दार्थ–वनस्पतिः = वनस्पतियाँ। **नः** = हमारे लिए। **मधुमान्** = मधुरता-युक्त। **गावः** = गायें। **माध्वीः** = मधुर। **भवन्तु** = होवें।

हिन्दी-अनुवाद–वनस्पतियाँ हमारे लिए मधुरतायुक्त होवें, सूर्य मधुर होवे अर्थात् मधुर अन्नादि प्रदान करने वाला होवे। गायें हमारे लिए मधुर होवें अर्थात् हमें मधुर दूध देने वाली होवें।

प्रथमः पाठः

विद्ययाऽमृतमश्नुते

(विद्या द्वारा अमरता को प्राप्त करता है)

पाठ-सार

प्रस्तुत पाठ 'ईशावास्योपनिषत्' से संकलित है। 'ईशावास्यम्' पद से आरम्भ होने के कारण इसे ईशावास्योपनिषत् की संज्ञा दी गई है। यह उपनिषत् यजुर्वेद की माध्यन्दिन एवं काण्व संहिता का 40वाँ अध्याय है, जिसमें 18 मन्त्र हैं।

इस पाठ के प्रारम्भ में दो मन्त्रों में ईश्वर की सर्वत्र विद्यमानता को दर्शाते हुए, कर्त्तव्य भावना से कर्म करने एवं त्यागपूर्वक संसार के पदार्थों का उपयोग एवं संरक्षण करने का निर्देश दिया गया है। आत्मस्वरूप ईश्वर की व्यापकता को जो लोग स्वीकार नहीं करते हैं, उनके अज्ञान को तृतीय मन्त्र में दर्शाया है। चतुर्थ मन्त्र में चैतन्य स्वरूप, स्वयं प्रकाश एवं विभु सर्वव्यापक आत्म तत्त्व का निरूपण है। पञ्चम एवं षष्ठ मन्त्रों में अविद्या अर्थात् व्यावहारिक ज्ञान एवं विद्या अर्थात् आध्यात्मिक ज्ञान पर सूक्ष्म चिन्तन निहित है। अन्तिम मन्त्र व्यावहारिक ज्ञान से लौकिक अभ्युदय एवं अध्यात्मज्ञान से अमरता की प्राप्ति को बतलाता है।

इस पाठ्यांश से यह सन्देश मिलता है कि लौकिक एवं अध्यात्म विद्या एक-दूसरे की पूरक है तथा मानव जीवन की परिपूर्णता एवं सर्वाङ्गीण विकास में समान रूप से महत्त्व रखती है।

पद्यांशों/मन्त्रों का अन्वय, शब्दार्थ, सप्रसंग हिन्दी भावार्थ एवं पठितावबोधनम्–

(1)

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥ 1॥

अन्वयः–जगत्यां यत् किञ्च जगत् इदम् सर्वं ईशावास्यं, तेन त्यक्तेन भुञ्जीथाः, कस्यस्विद् धनं मा गृधः।

शब्दार्थ–जगत्याम् = इस संसार में। **यत् किञ्च** = जो कुछ भी। **जगत्** = चराचर जगत् है। **इदम्** = यह। **सर्वम्** = सम्पूर्ण। **ईशा** = परब्रह्म परमेश्वर से। **आवास्यम्** = व्याप्त है, आच्छादित है। **तेन** = इसलिए। **त्यक्तेन** = त्यागपूर्वक अर्थात् आसक्ति रहित होकर। **भुञ्जीथाः** = उपभोग करो। **कस्यस्वित्** = किसी के। **धनम्** = धन की। **मा गृधः** = आकांक्षा मत करो, लालच मत करो।

प्रसंग–प्रस्तुत पद्यांश/मन्त्रांश हमारी पाठ्यपुस्तक 'शाश्वती-भाग दो' के 'विद्ययाऽमृतमश्नुते' शीर्षक पाठ से उद्धृत है। मूलतः यह पाठ 'ईशावास्योपनिषद्' से संकलित है। प्रस्तुत मन्त्रांश में ईश्वर की सर्वत्र विद्यमानता को दर्शाते हुए त्यागपूर्वक एवं लालच से रहित संसार के पदार्थों का उपभोग करने की प्रेरणा दी गई है।

हिन्दी भावार्थ–सम्पूर्ण ब्रह्माण्ड में जो कुछ भी यह चराचरात्मक जगत् दृष्टिगत हो रहा है, वह सम्पूर्ण ईश्वर से व्याप्त है। इसलिए त्यागवृत्ति से इसका सेवन करो तथा किसी के भी (स्वकीय या परकीय) धन की आकांक्षा मत करो, उसके लिए लोभ मत करो। अर्थात् मानव को आसक्ति एवं लालच से रहित होकर पदार्थों का उपभोग करना चाहिए।

पठितावबोधनकार्यम्–

निर्देशः–उपर्युक्तमन्त्रं पठित्वा एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिखत–

प्रश्नाः–

(क) एकपदेन उत्तरत—

इदं सर्वं केन आवास्यम्?

(ख) पूर्णवाक्येन उत्तरत—

किम् मा गृधः?

(ग) भाषिककार्यम्—(विकल्पेभ्यः उचितम् उत्तरं चिनुत–)

(i) 'जगत्' इति कर्तृपदस्य क्रियापदं किमस्ति?

(अ) भुञ्जीथा (ब) गृधः (स) आवास्यम् (द) ईशा

(ii) 'त्यक्तेन' इति संज्ञापदस्य सर्वनामपदं किम्?

(अ) इदम् (ब) तेन (स) सर्वम् (द) मा

उत्तराणि—(क) ईशा (ईश्वरेण)।

(ख) कस्यस्विद् धनं मा गृधः।

(ग) (i) (स) (ii) (ब)।

(2)

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥ 2॥

अन्वयः–इह कर्माणि कुर्वन् एव शतं समाः जिजीविषेत् एवम् कर्म त्वयि नरे न लिप्यते, इतः अन्यथा न अस्ति।

शब्दार्थ–इह = इस संसार में। **कर्माणि** = कर्मों को। **कुर्वन्** = करते हुए। **एव** = ही। **शतम् समाः** = सौ वर्षों तक। **जिजीविषेत्** = जीने की इच्छा करनी चाहिए। **एवम्** = इस प्रकार (त्याग भाव से)। **कर्म** = किये जाने वाले कर्म। **त्वयि नरे** = तुझ मनुष्य में। **न लिप्यते** = लिप्त नहीं होंगे। **इतः** = इससे (भिन्न)। **अन्यथा** = अन्य कोई प्रकार अर्थात् मार्ग। **न अस्ति** = नहीं है।

प्रसंग–प्रस्तुत पद्यांश/मन्त्रांश हमारी पाठ्यपुस्तक 'शाश्वती-भाग दो' के 'विद्ययाऽमृतमश्नुते' शीर्षक पाठ से लिया गया है। मूलतः यह पाठ 'ईशावास्योपनिषद्' से संकलित है। इस मन्त्रांश में शास्त्रनियत एवं त्याग भाव से युक्त कर्म करने की प्रेरणा देते हुए कहा है कि—

हिन्दी भावार्थ–इस संसार में शास्त्रनियत कर्मों को करते हुए ही सौ वर्षों तक जीने की इच्छा करनी चाहिए। इस प्रकार त्याग भाव से किये जाने वाले कर्म तुझ मनुष्य में लिप्त नहीं होंगे। इससे भिन्न अन्य कोई प्रकार अर्थात् मार्ग नहीं है जिससे कि मानव कर्म के बन्धनों से मुक्त हो सके।

पठितावबोधनकार्यम्–

1. प्रश्नाः– **(माध्य. शिक्षा बोर्ड, मॉडल पेपर, 2025-26)**

(क) एकपदेन उत्तरत—

नरे किं न लिप्यते?

(ख) पूर्णवाक्येन उत्तरत–

किं कुर्वन् नरः शतं समाः जिजीविषेत्?

(ग) भाषिककार्यम्– (शुद्धम् उत्तरं चित्वा लिखत)

(i) 'समाः' इति विशेष्यपदस्य अत्र विशेषणपदं किम्?

(अ) कर्म (ब) शतं (स) इह (द) कुर्वन्

(ii) 'लिप्यते' इति क्रियापदस्य अत्र कर्तृपदं किम्?

(अ) नरे (ब) त्वयि (स) समाः (द) कर्म

उत्तराणि–(क) कर्म।

(ख) कर्माणि कुर्वन् नरः शतं समाः जिजीविषेत्।

(ग) (i) (ब) (ii) (द)

2. प्रश्नाः– **(माध्य. शिक्षा बोर्ड, मॉडल पेपर, 2022-23)**

(i) नरे किं न लिप्यते? (एकपदेन उत्तरत)

(ii) किं कुर्वन् नरः शतं समाः जिजीविषेत्? (पूर्णवाक्येन उत्तरत)

(iii) 'वर्षाणि' इति पदस्य पद्यांशे पर्यायपदं किमस्ति?

उत्तराणि–(i) कर्म।

(ii) कर्माणि कुर्वन् नरः शतं समाः जिजीविषेत्।

(iii) समाः।

3. प्रश्नाः–

(क) एकपदेन उत्तरत—

किम् त्वयि न लिप्यते?

(ख) पूर्णवाक्येन उत्तरत—

नरः कानि कुर्वन् शतं समाः जिजीविषेत्?

(ग) भाषिककार्यम्—(विकल्पेभ्यः उचितम् उत्तरं चिनुत–)

(i) 'समाः' इति विशेष्यपदस्य विशेषणपदं किमस्ति?

(अ) कर्माणि (ब) शतम् (स) कुर्वन (द) इह

(ii) 'कर्म' इति कर्तृपदस्य क्रियापदं पद्यांशे किम्?

(अ) कुर्वन् (ब) अस्ति (स) जिजीविषेत् (द) लिप्यते

उत्तराणि—(क) कर्म।

(ख) नरः कर्माणि कुर्वन् शतं समाः जिजीविषेत्।

(ग) (i) (ब) (ii) (द)।

(3)

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।

ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥ 3॥

अन्वयः–असुर्याः नाम लोकाः ते अन्धेन तमसा आवृताः, ये च के आत्महनः जनाः ते प्रेत्य तान् अभिगच्छन्ति।

शब्दार्थ–असुर्याः = असुरों के। **नाम** = प्रसिद्ध। **अन्धेन तमसा** = अज्ञान तथा दुःख क्लेश रूप महान् अन्धकार से। **आवृताः** = आच्छादित हैं। **ये के च** = जो कोई भी। **आत्महनः** = आत्महत्या करने वाले। **प्रेत्य** = मरकर। **तान्** = उन भयंकर लोकों को। **अभिगच्छन्ति** = बार-बार प्राप्त होते हैं।

प्रसंग–प्रस्तुत पद्यांश/मन्त्रांश हमारी पाठ्यपुस्तक 'शाश्वती-भाग दो' के 'विद्ययाऽमृतमश्नुते' शीर्षक पाठ से लिया गया है। मूलतः यह पाठ 'ईशावास्योपनिषद्' से संकलित है। इस मन्त्रांश में असुर सम्बन्धी लोकों को किस प्रकार के लोग प्राप्त करते हैं, इसका विवेचन करते हुए आत्मघाती मनुष्य के बारे में बतलाया गया है।

हिन्दी भावार्थ–असुरों के जो प्रसिद्ध नाना प्रकार की योनियों वाले नरक रूप लोक हैं, वे सभी अज्ञान तथा दुःख क्लेश रूप महान् अन्धकार से आच्छादित हैं। संसार में जो कोई भी आत्मा की हत्या करने वाले मनुष्य हैं, वे सब मृत्यु के उपरान्त उन्हीं भयंकर लोकों को पुनः-पुनः प्राप्त होते हैं। वस्तुतः आत्मज्ञान शून्य मानव ही आत्मघाती है।

पठितावबोधनकार्यम्–

1. प्रश्नाः– **(माध्य. शिक्षा बोर्ड, 2025)**

(क) एकपदेन उत्तरत–

ते लोकाः के?

(ख) पूर्णवाक्येन उत्तरत–

ते लोकाः केन आवृताः?